विश्वान्य् अस्मै सुदिनानि रायो द्युम्नान्य् अर्यो वि दुरो अभि द्यौत् ॥ ४.००४.०६ ॥
सेद् अग्ने अस्तु सुभगः सुदानुर् यस् त्वा नित्येन हविषा य उक्थैः ।
पिप्रीषति स्व आयुषि दुरोणे विश्वेद् अस्मै सुदिना सासद् इष्टिः ॥ ४.००४.०७ ॥
अचामि ते सुमतिं घोष्य् अर्वाक् सं ते वावाता जरताम् इयं गीः ।
स्वश्वास् त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेर् अनु द्यून् ॥ ४.००४.०८ ॥
इह त्वा भूर्य् आ चरेद् उप त्मन् दोषावस्तर् दीदिवांसम् अनु द्यून् ।
क्रीळन्तस् त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानाम् ॥ ४.००४.०९ ॥
यस् त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ।
तस्य त्राता भवसि तस्य सखा यस् त आतिथ्यम् आनुषग् जुजोषत् ॥ ४.००४.१० ॥
महो रुजामि बन्धुता वचोभिस् तन् मा पितुर् गोतमाद् अन्व् इयाय ।
त्वं नो अस्य वचसश् चिकिद्धि होतर् यविष्ठ सुक्रतो दमूनाः ॥ ४.००४.११ ॥
अस्वप्नजस् तरणयः सुशेवा अतन्द्रासो ऽवृका अश्रमिष्ठाः ।
ते पायवः सध्र्यञ्चो निषद्याग्ने तव नः पान्त्व् अमूर ॥ ४.००४.१२ ॥
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितात् अरक्षन् ।
ररक्ष तान् सुकृतो विश्ववेदा दिप्सन्त इद् रिपवो नाह देभुः ॥ ४.००४.१३ ॥
त्वया वयं सधन्य् ऽ स् त्वोतास् तव प्रणीत्य् अश्याम वाजान् ।
उभा शंसा सूदय सत्यताते ऽनुष्ठुया कृणुह्य् अह्रयाण ॥ ४.००४.१४ ॥
अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्य् अ ऽ स्मान् द्रुहो निदो मित्रमहो अवद्यात् ॥ ४.००४.१५ ॥

सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन ।
अग्नये जातवेदसे ॥ ५.००५.०१ ॥
नराशंसः सुषूदतीमं यज्ञम् अदाभ्यः ।
कविर् हि मधुहस्त्यः ॥ ५.००५.०२ ॥
ईळितो अग्न आ वहेन्द्रं चित्रम् इह प्रियम् ।
सुखै रथेभिर् ऊतये ॥ ५.००५.०३ ॥
ऊर्णम्रदा वि प्रथस्वाभ्य् अ ऽ र्का अनूषत ।
भवा नः शुभ्र सातये ॥ ५.००५.०४ ॥
देवीर् द्वारो वि श्रयध्वं सुप्रायणा न ऊतये ।
प्र-प्र यज्ञम् पृणीतन ॥ ५.००५.०५ ॥
सुप्रतीके वयोवृधा यह्वी ऋतस्य मातरा ।
दोषाम् उषासम् ईमहे ॥ ५.००५.०६ ॥
वातस्य पत्मन्न् ईळिता दैव्या होतारा मनुषः ।
इमं नो यज्ञम् आ गतम् ॥ ५.००५.०७ ॥
इळा सरस्वती मही तिस्रो देवीर् मयोभुवः ।
बर्हिः सीदन्त्व् अस्रिधः ॥ ५.००५.०८ ॥
शिवस् त्वष्टर् इहा गहि विभुः पोष उत त्मना ।
यज्ञे-यज्ञे न उद् अव ॥ ५.००५.०९ ॥
यत्र वेत्थ वनस्पते देवानां गुह्या नामानि ।
तत्र हव्यानि गामय ॥ ५.००५.१० ॥